ऋ०सं०

॥१॥

श्रीगजवदनाय नमः ॥ प्रचंडसूर्यस्पृहणीयचंद्रमाः सदावगाहक्षत
वारिसंचयः ॥ दिनांतरम्योऽभ्युपशांतमन्मथो निदाघकाळः समुपागतः
प्रिये ॥ १ ॥ निशाः शशांकक्षतिनीळराजयः क्वचिद्विचित्रं जळयंत्रमंदिरं ॥
मणिप्रकारं सरसं च चंदनं शुचौ प्रिये याति जनस्य सेव्यतां ॥ २ ॥ सुवासितं
हर्म्यतळं मनोरमं प्रियामुखश्वाससविकंपितं मधु ॥ सुतंत्रिगीतं मदनस्य
दीपनं शुचौ निशीथेऽनुभवंति कामिनः ॥ ३ ॥ नितंबबिंबैः सदुकूलमेखलैः
स्तनैः सहाराभरणैः सचंदनैः ॥ शिरोरुहैः स्नानकषायवासितैः स्त्रियो नि
दाघं शमयंति कामिनां ॥ ४ ॥ नितांतलाक्षारसरागरंजितैर्नितंबिनीनां चरणैः
सनूपुरैः ॥ पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथं ॥ ५ ॥
पयोधराश्चंदनपंकचर्चितास्तुषारगौरार्पितहारशेखराः ॥ नितंबबिंबा
श्च सहेममेखलाः प्रकुर्वते कस्य मनो न सोत्सुकं ॥ ६ ॥ समुद्गतं स्वेदविनां
गसंधयो विमुच्य वासांसि गुरूणि सांप्रतं ॥ स्तनेषु सूक्ष्मांशुकमुन्नत

राम

॥१॥

Acc No:- ~~350~~ M1060.
Title. ऋतुसंहार
Author.- कालिदास
Subject. poetry.
Page. (10)

(1)

स्तनानि वेदयंते प्रमदाः स्वयौवनं॥७॥ सचंदनांबुव्यजनोद्भवानिलैः स
हारयष्टिस्तनमंडळार्पणैः॥ सवल्लुकीकोकिळगीतनिस्वनैर्विबुध्यते
सुप्त इवाद्य मन्मथः॥८॥ सितेषु हर्म्येषु निशासु योषितां सुखप्रसुप्ता
निमुखानि चंद्रमाः॥ विलोक्य नियंत्रणमुत्सुकश्चिरं निशाक्षये याति
ह्रियेव पंडुतां॥९॥ असह्यवातोद्धतरेणुमंडळा प्रचंडसूर्यातपतापिता
मही॥ न शक्यते द्रष्टुमपि प्रवासिभिः प्रियावियोगानळदग्धमानसैः॥१०॥
मृगाः प्रचंडातपतापिता भृशं तृषा महत्या परिशुष्कतालवः॥ वनांतरे तो
यमिति प्रधाविता निरीक्ष्य भिन्नांजनसंनिभं नभः॥११॥ सविभ्रमैः सस्मि
तजिह्मवीक्षितैर्विलासवत्यो मनसि प्रसंगिनां॥ अनंगसंदीपनमाशु कु
र्वते यथा प्रदोषाश्शशिचारुभूषणाः॥१२॥ रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथितप्तपांसुभिः॥ अवाङ्मुखो जिह्मगतिः श्वसन्मुहुः फ
णी मयूरस्य तळे निषीदति॥१३॥ तृषा महत्या हतविक्रमोद्यतः श्व

ऋ० सं०

॥२॥

सन्मुखोर्ध्वरविदुरिताननः॥ न हंत्यदूरेपि गजान्नाजाहितो विलोलजिह्वः
चलिताग्रकेसरी॥१४॥ विशुष्ककंठाहृतशीकरांभसो गभस्तिभिर्भानुमतोभि
तापिता॥ प्रवृद्धतर्षो महतो जलार्थिनो न दंतिनः केसरिणोपि बिभ्यति॥१५॥
हुताशकल्पैः सवितुर्मरीचिभिः कलापिनः क्लांतशरीरचेतसः॥ न भोगिनं घ्नं
ति समीपवर्त्तिनं कलापचक्रेषु निवेशिताननं॥१६॥ सगर्भमुस्तं परिपांडुकर्दमं स
रः खनन्नायतपोत्रमंडलैः॥ प्रदीप्तभासा रविणाभितापितो वराहयूथो विश
तीव भूतलं॥१७॥ विवस्वता तीक्ष्णतरांशुमालिना सपंकतोयात्सरसोभितापि
तः॥ उपेत्य भेकस्तृषितस्य भोगिनः फणातपत्रस्य तले निषीदति॥१८॥ समुद्ध
ताशेषमृणालजालकं विपन्नमीनं द्रुतभीतसारसं॥ परस्परोत्पीडनसंहतैर्ग
जैः कृतं सरः सांद्रविमर्दकर्दमं॥१९॥ रविप्रभोद्भिन्नशिरोमणिप्रभो विलोलजि
ह्वद्वयलीढमारुतः॥ हुताग्निसूर्यातपतापितः फणी न हंति मंडूककुलं तृषाकु
लः॥२०॥ सफेनलालाकुलवक्त्रसंपुटं विनिर्गतालोहितजिह्वमुन्मुखं॥ तृ

राम

॥२॥

षाकुळंनिःसृतमद्रिगह्वरान्वेषमाणंमहिषीकुळंजळं॥२१॥पटुतरवनदाहा
लुषशोभाःसमग्राःपरुषपवनवेगोत्क्षिप्तसंशुष्कपर्णाः॥दिनकरपरितापात्क्षीण
तोयाःसमंताद्विदधतिभयमुच्चैर्वीक्ष्यमाणावनांताः॥२२॥श्वसितविहगवर्गाःशी
र्णपर्णद्रुमस्थःकपिकुळमुपयातिक्लांतमद्रेर्निकुंजं॥भ्रमतिगवययूथंसर्वतस्तो
यमिच्छंशरभकुळमजिह्मंप्रोद्धरत्यंबुकूपात्॥२३॥विकचनवकुसुंभस्वच्छ
सिंदूरभासाप्रबळपवनवेगोद्भूतवेगेनतूर्णं॥तरुविटपलताग्रालिंगनव्याकु
ळेनदिशिदिशिपरिदग्धाभूमयःपावकेन॥२४॥ध्वनतिपवनबंधुःपर्वतांताद
रीषुस्फुटतिपटुनिनादःशुष्कवंशस्थलीषु॥प्रसरतितृणमध्येलब्धवृद्धिःक्ष
णेनक्षपयतिमृगवर्गंप्रांतलग्नोदवाग्निः॥२५॥पटुतरइवजातःशाल्मलीनांव
नेषुस्फुरतिकनकगौरःकोटरेषुद्रुमाणां॥परिणतदळशाखांश्चातपेनाशुवृक्षा
न्दहतिपवनधूतःसर्वतोग्निर्वनांते॥२६॥गजगवयमृगेंद्रावह्निसंतप्तदेहाःसु
हृदइवसमेतोद्वंद्वभावंविहाय॥हुतवहपरिखेदादाशुनिर्गत्यकक्षाद्विपुळ
पुलिनदेशांनिम्नगामाश्रयंति॥२७॥कमळवनचिताभाःपाटलामोदरम्यो

ऋ० सं०
॥३॥

मुखसलिलनिषेकैः सेव्यचंद्रांशुहारः॥ व्रजतु तव निदाघः कामिनीभिः समेतो
निशि सुललितगीते हर्म्यपृष्ठे सुखेन॥२८॥ ॥इति श्रीकविराजकालिदास
विरचिते ऋतुसमुच्चये ग्रीष्मवर्णनं नाम प्रथमोऽसर्गः॥ ॥१॥ ॥ससीकरां
भोधरमत्तकुंजरस्तडित्पताकोऽशनिशब्दमर्द्दलः॥ समागतो राजवदुद्धतद्युति
र्घनागमः कामिजनप्रियः प्रिये॥१॥ नितांतनीलोत्पलकांतिभिः क्वचित्क्वचित्प्र
भिन्नांजनरागसंनिभैः॥ क्वचित्सगर्भप्रमदास्तनोपमैः समाश्रितं व्योम घनैः समं
ततः॥२॥ तृषाकुलैश्चातकपक्षिणां कुलैः प्रयाचितास्तोयभरावलंबिनः॥ प्रयांति
मंदं बहुवारिवर्हिणो बलाहकाः श्रोत्रमनोहरस्वनाः॥३॥ बलाहकाः सान्द्रानिशाद्द
भूषणाः सुरेंद्रचापं दधतस्तडिद्गुणं॥ सुतीक्ष्णधारापतितोग्रसायकैस्तुदंति चेतो ध्व
निभिः प्रवासिनां॥४॥ प्रभिन्नवैडूर्यनिभैस्तृणांकुरैः समाचिता प्रोछितकंदलीभिः॥
विभाति शुक्लेतररत्नभूषिता वरांगनेव क्षितिरिंद्रतोयैः॥५॥ सदामतोयः पथि
कृष्णनोत्सुको वितीर्णविस्तीर्णकपालशोभिनां॥ ससंभ्रमालिंगनचुंबनाकुलं प्रवृ
त्तनृत्तं कुलबर्हिणानां॥६॥ विपाटयंतः परितस्तटद्रुमाः प्रवृद्धवेगाः सलिलैरनिर्ज्ज

राम
॥३॥

लैः।। ।।७।।

तृणैरतीवोद्गतकोमलांकुरैर्नितांतनीलैर्हरिणीमुखक्षतैः।। वनानि विंध्यानि हरं
ति मानसं वितर्षितात्युद्गतपल्लवैर्द्रुमैः।।८।। विलोलनेत्रोत्पलशोभिताननैर्मृगैः स
मंतादुपजातसाध्वसैः।। समाचिता सैकतिनी वनस्थली समुत्सुकत्वं प्रकरोति मान
सं।।९।। सतीक्ष्णमुच्चैर्ध्वनतां पयोमुचां घनांधकारीकृतशार्वरीष्वपि।। तडित्वदर्शित
मार्गभूमयः प्रयांति वेगादभिसारिकाः स्त्रियः।।१०।। पयोधरैर्भीमगभीरनिस्वनैर्धु
नज्झिरुच्चैर्जितचेतसो भृशं।। कृतापराधानपि योषितः प्रियान्परिष्वजंते शयने निरंतरं।।११।।
विलोचनेंदीवरवारिबिंदुभिर्विपक्वबिंबाधरचारुपल्लवाः।। निरस्तमाल्याभरणानु
लेपनाः स्थितानिराशाः प्रमदाः प्रवासिनां।।१२।। विपांडुरं कीटरजस्तृणान्वितं भुजंगव
द्वक्रमतिप्रसर्पितं।। ससाध्वसैर्भेककुलैर्विलोकितं प्रयाति निम्नाभिमुखं नवोदकं।।१३।।
विपन्नपत्रां नलिनीं समुत्सुकां विहाय भृंगाः श्रुतिहारनिस्वनाः।। पतंति मूढाः शिखि
नां प्रनृत्यतां कलापचक्रेषु नवोत्पलाशया।।१४।। वनद्विपानां नवतोयदस्वनैर्मदा
न्वितानां ध्वनतां मुहुर्मुहुः।। कपोलदेशा विमलोत्पलप्रभाः सभृंगयूथैर्मदवारि

6

ऋ० स०
॥४॥

भिश्चिताः॥१५॥ सतोयलंबांबुदचुंबितोत्पलाः समाचिताः प्रस्रवणैः समंत
ततः॥ प्रवृत्तनृत्यैः शिखिभिः समाकुलाः समुत्सुकत्वं जनयंति भूधराः॥१६॥ कदं
बसर्जार्जुननीपकेतकीविकंपयंस्तत्कुसुमाधिवासितः॥ ससीकरांभोधरसंग
शीतळः समीरणः कं न करोति सोत्सुकं॥१७॥ शिरोरुहैः श्रोणितटावलंबिभिः कृता
वतंसैः कुसुमैः सुगंधिभिः॥ स्तनैः सुपीनैर्वदनैः सुगंधिभिः स्त्रियो रतिं संजनयंति
कामिनां॥१८॥ तडिल्लताशक्रधनुर्विभूषिताः पयोधरास्तोयभरावलंबिनः॥ स्त्रियश्च
कांचीगुणकुंडलोज्वलानि हरंति चेतो युगपत्प्रवासिनां॥१९॥ माळाः कदंबनवकेस
रकेतकीभिरायोजिताः शिरसि बिभ्रति योषितायाः॥ कर्णांतरेषु ककुभद्रुममंज
रीभिर्यीच्छानुकूळरचितानवतंसकांश्च॥२०॥ कालागरुप्रचुरचंदनचर्चितांग्यः पु
ष्पावतंससुरभीकृतकेशपाशाः॥ श्रुत्वा ध्वनिं जळमुचां त्वरितं प्रदोषे शय्यागृहं गु
रुगृहात्प्रविशंति नार्यः॥२१॥ कुवलयदळनीळैरुन्नतैस्तोयनम्रैर्मृदुपवनविधूतै
र्मंदमंदं चलद्भिः॥ अपहृतमिव चेतस्तोयदैः सेंद्रचापैः पथिकजनवधूनां तद्वियो राम
गक्षतानां॥२२॥ मुदित इव कदंबैर्जातपुष्पैः समंतात्पवनचलितशाखैः शाखिभि ॥४॥

नृत्यतीव॥ सहितइवविधूतैः स्रूचिभिः केतकीनां॥ नवसलिलनिषेकाच्छांततापो
वनांतात्॥२३॥ शिरसि कुवलयमाळांमालतीभिः समंतात्कुसुमितनवपुष्पैर्यूथि
कांकुंडळैश्च॥ विकचनवकदंबैः कर्णिकारैर्वधूनां रचयति जळदौघः कांतवत्का
ळएषः॥२४॥ विकचकुवलयाग्रैरुन्नतैर्हारयष्टिंप्रतनुतसित कूळे व्यीयतेः श्रो
णिबिंबैः॥ नवजळकणसेकैरुद्गतारोमराजिस्त्रिवलितवलितांगंमध्यदेशैश्च नार्यः॥२५॥
नवजळकणसंगाच्छीततामादधानं कुसुमभरलतानां लासकः पादपानां॥ जनयति
गुरुरागं केतकीनां रजोभिः परिहरति नभस्वान् प्रोषितानां मनांसि॥२६॥ जळभरन
मितानामाश्रयोस्माकमुच्चैरितिजळकणसेकैस्तोयदास्तोयनम्राः॥ अतिशय
परुषाभिर्ग्रीष्मवह्नेः शिखाभिः समुपजनिततापं ह्लादयंतीव मध्यं॥२७॥ इतिब
हुगुणरम्यः कामिनां चित्तहारी तरुविटपलतानां बांधवो निर्विकारः॥ जळदसम
यएषः प्राणिनांप्राणभूतो दिशतु तव हितानि प्रायशो वांछितानि॥२८॥ ॥छ॥
॥ इतिश्रीकविराजकाळिदासविरचिते ऋतुसमुच्चये प्रावृड्वर्णनंनाम द्वितीयः
सर्गः॥२॥५६॥ ॥छ॥ ॥ काशांशुकाविकचपद्ममनोज्ञवक्त्रा सोन्मादहंसर

ऋ॰सं॰ ७
॥५॥

तनूपुरपादरम्या॥ आपक्वशालिरुचिरानतगात्रयष्टिः प्राप्ता शरन्नववधूरिव
हाररूपा॥१॥ काशैर्मही शिशिरदीधितिना रजन्यो हंसैर्जलानि सरितां कुमुदैः स
रांसि॥ सप्तच्छदैः कुसुमभारनतैर्वनांताः शुक्लीकृतान्युपवनानि च मालतीभिः॥२॥
चंचन्मनोज्ञशफरीरसनाकलापाः पर्यंतसंस्थितसितांबुजपंक्तिहाराः॥ नद्यो विशा
लपुलिनांतनितंबबिंबा मंदं प्रयांति समदाः प्रमदा इवाद्याः॥३॥ व्योम क्वचिद्रज
तशंखमृणालगौरैस्त्यक्तांबुभिर्लघुतया शतशः प्रयातैः॥ उत्सेव्यते पवनवेगचलैः प
योदैराजेव चामरशतैरभिवीज्यमानैः॥४॥ भिन्नांजनप्रचयकांति नभो मनोज्ञं बं
धूकपुष्परचितारुणिता च भूमिः॥ वप्राश्च चारुकमलावृतभूमिभागा उत्कंठयंति
न मनो भुवि कस्य यूनः॥५॥ मंदानिलाकुलितचारुमनोज्ञशाखः पुष्पोद्गमः प्रच
यकोमलपल्लवाग्रः॥ मत्तद्विरेफपरिपीतमधुप्रसेकश्चित्तं विदारयति कस्य
न कोविदारः॥६॥ तारागणप्रचुरभूषणमुद्वहंती मेघोपरोधपरिमुक्तशशांकवक्त्रा॥
ज्योत्स्नादुकूलममलं रजनी दधाना वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला॥७॥ कारं
डवाननविघट्टितवीचिमालाः कादंबसारसकुलाकुलतीरदेशाः॥ कुर्वंति हंसवि

राम
॥५॥

रुतैः परितोजनस्य प्रीतिं सरोरुहरजोरुणिता नळिन्यः ॥८॥ नेत्रोत्सवो हृदय
हारमरीचिमाळः प्रह्लादकः शिशिरसीकरवारिवर्षी ॥ पत्युर्वियोगविषदग्धशर
क्षतानां चंद्रो दुनोत्यनुदिनं तनुमंगनानां ॥९॥ आकंपयन्फळभरानतशाळिजा
ळमानर्त्तयन्तरुवरान्कुसुमावनम्रान् ॥ उत्फुल्लपंकजवनां नळिनीं विधुन्वन्
यूनां मनश्चलयति प्रसभं नभस्वान् ॥१०॥ सोन्मादहंसविरुतैरुपशोभितानि स्व
च्छानि फुल्लकमळोत्पलभूषितानि ॥ मंदप्रयातपवनोद्धुतवीचिमाळान्युत्कंठ
यंति हृदयं प्रसभं मनांसि ॥११॥ नष्टं धनुर्बळभिदो जलदोदरेषु सौदामिनी स्फु
रति नाद्य वियत्पताका ॥ धुन्वंति पक्षपवनैर्न नभो बळाकाः पश्यंति नोन्नतमुखा
गगनं मयूराः ॥१२॥ नृत्यप्रमोदरहितान्शिखिनो विहाय हंसानुपैति मदनो मधुर
प्रगीतान् ॥ त्यक्त्वा कदंबकुटजार्जुनराजवृक्षान्सप्तच्छदानुपगता कुसुमोद्गमश्रीः ॥१३॥
शेफाळिकाकुसुमगंधमनोहराणि स्वस्थस्थितांडजकुळप्रतिनादितानि ॥ पर्यंतसं
स्थितमृगीनयनोत्पळानि प्रोत्कंठयंत्युपवनानि मनांसि यूनां ॥१४॥ कल्हारप
द्मकुमुदानि मनो विधुन्वन्तत्संगमादधिकशीतळतामुपेतः । उत्कं करोति [illegible]

(10)